# श्री विष्णु सूक्तम्

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः । प्रतद्विष्णुस्स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ॥

उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम् । परमस्य वित्से । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । ऊरुक्षितिं सुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषग्ग्–ह्यस्य स्थविरस्य नाम ॥

अतो देवा अवन्तुनो यतो विष्णु–र्विचक्रमे । पृथिव्यास्सप्त धामभिः । इदं विष्णु–र्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाग्ं सुरे । त्रीणि पदा विचक्रमे विष्णुर्गोपा

अदाभ्यः । ततो धर्माणि धारयन् । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यस्सखा ॥

तद्विष्णोः परमं पदग् सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवाग् सस्समिन्धते । विष्णो–र्यत्परमं पदम् । पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तम महर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

www.YouSigma.com